शास्त्री - II खण्ड साहित्यम्

रघुवंश महाकाव्यम्-चतुर्दशः सर्गः

① प्र० → स मौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानन्दितपौरवर्गः ।
विवेश सौधोद्गत लाजवर्षामुत्तोरणामन्वयराजधानीम् ॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति ।

व्याख्या :→ अस्मिन् श्लोके साकेतोपवने तस्मिन् अभिषेका श्रीरामः वृद्धमन्त्रिभिः सपरिजनविभीषण-सुग्रीवादिभिश्च सार्कं तूर्यादिवाद्यैरयोध्यावासिनो नागरिकान् नन्दयन् उत्सवदर्शनीयां रघुवंशराजधानीम् अयोध्यानगरीं प्रविवेश । तदानीं शोभायात्रावसरेऽयोध्यायाः नागरिकाः महता हर्षोल्लासेन सुधाक्लिप्ताट्टालिकागवाक्षेभ्यः श्रीरामोपरि लाजावृष्टीः प्रसूनप्रक्षेपं चाकार्षुः तथा तत्सम्मानप्रदर्शनार्थं स्व-स्व भवनसमीपे कदलीस्तम्भाम्र-पल्लवतोरणादिसज्जीवितानं प्रदर्शयामासुरिति भावः

Renu Devi
12/10/20
राधा उमाकान्त सं० महावि० सुरखसेना,
पूर्णिया ।

उपशास्त्री - खण्ड साहित्यम - तृतीय: पत्रम्

रघुवंश महाकाव्यम्
द्वितीय: सर्ग:

स्थित: स्थितामुच्चलित: प्रयातां निषेदुषीमासनबन्धधीर: ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥

उत्तरम्:- प्रसँग: — प्रस्तुतोऽयं श्लोक: महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

व्याख्या:- भूपति: = पृथ्वीपति: राजा दिलीप:, तां = नन्दिनीम्, स्थितां = अवस्थितां सतीम्, स्थित: = तिष्ठन् सन प्रयातां = प्रचलिताम्, उच्चलित: = प्रचलन् गच्छन् सन्, निषेदुषीं = उपविष्टाम्, आसनबन्धधीर: = स्थिरतयोपविष्ट: सन्, जलं = पानीयम्, आददानां = पिबन्तीम्, जलाभिलाषी = जलं पिबन् सन् (तां वसिष्ठ धेनुम्), छाया = प्रतिबिम्बम्, इव = यथा, अन्वगच्छत् = अनुजगाम

भावार्थ = राजा दिलीप उस नन्दिनी के ठहरने पर ठहरते हुए, चलने पर चलते हुए, बैठने पर बैठते हुए, पानी पीने पर पानी पीते हुए छाया के समान उसके पीछे - पीछे चले

Renu Devi
12/10/20
रा०उ० सं० महावि० सुरवसेना, पूर्णिया ।

शास्त्री-प्रखण्ड साहित्यम्

सप्तमोऽङ्कः अभिज्ञानशाकुन्तलम्

सुतनु! हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत्।
प्रबलतमसामेवंप्रायाः शुभेषु प्रवृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥

उत्तरम्- प्रसंगः - प्रस्तुतोऽयं श्लोक महाकवि कालिदास विरचितः अभिज्ञानशाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन श्लोक शकुन्तलाहृदयात् निराकरणदुःखं दूरीकर्तुं प्रयतमानो नृपो दुष्यन्तः तां प्रियां शकुन्तलामनुनयन्नाह -

व्याख्या:- हे शशाङ्कतिलके प्रिये! प्राक् सत्कृतनिराकृतिदुःखं स्वहृदयात् निष्कासनीयम्, यतो मया जानता तन्न कृतम्। तदानीं काले मम हृदये (सुलभकोपात् महर्षे दुर्वाससः शापात्) प्रबलः सम्मोह आसीत्। इदानीमङ्गुलीयकदर्शनेन सो व्यपगतः। यथा नेत्रहीनः पुमान् केनापि पुंसा निजगले निहितां सुरभिपुष्पमालामपि सर्पस्याशङ्कया स्वकीयाद् गलान्निस्सार्य दूरमुत्क्षिपति तथैव पूर्वं ते स्मृतिहीनेन मया स्वयमुपस्थितापि प्रत्याख्यान काले प्रत्याख्याता। अतो मया महद्दुःखमनुभूतं त्वं प्रत्याख्याता। अतो मया महद्दुःखमनुभूतं त्वं अत्यन्तं क्लेशिता च भवती। तदेतत्सर्वमजानता मत्कृतं मत्वा क्षम्यतामिति तात्पर्यम्। अत्राप्रस्तुत-प्रशंसा-भ्रान्ति मय-काव्यलिंग-दृष्टान्तालंकाराः हरिणीवृत्तं च।

Renu Devi
12/10/20

राधा उमाकान्त सं० महा० वि० सुखसेना,
पूर्णिया।

उपशास्त्री- II खण्ड    साहित्यम् · तृतीय - पत्रम्

## रघुवंशमहाकाव्यम्
### द्वितीयः सर्गः

स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन्श्लोके महर्षि वशिष्ठः राजा दिलीपं प्रति कथयति - प्रशंसनीयस्वभावः सत्सु वत्सलप्रेमवान्च द्वत्सलः सज्जनप्रियश्च राजा दिलीपः गुरोराज्ञया वत्सपानहोमादि कार्ययोरनन्तरम वशिष्ठं नन्दिनीदुग्धं समुज्ज्वलं साकारं यश इव अतिप्रेम्णा पीतवान् ।

व्याख्या:- अनिन्दितात्मा = अगर्हितस्वभावः, सद्वत्सल = सज्जनानुरागवान्, वसिष्ठेन = गुरुणा, कृताभ्यनुज्ञः = दत्तानुमतः, सः = राजा दिलीपः, वत्सहुतावशेषं = वत्सपानयज्ञाहुत्यवशिष्टम्, नन्दिनीस्तन्यं = नन्दिनीपयः, मूर्तं = मूर्तिमत्, शुभ्रं = शुक्लम्, यश इव = कीर्तिमिव, अतितृष्णः = उत्कण्ठितः सन्, पपौ = पीतवान् ।

Renu Devi
12/10/20

रा० उ० सं० महावि० सुखसेना, पूर्णिया ।